# સુરતકથામૃતં અથવા આર્યશતકમ્

## Suratakathamritam Athava Aryashatakam

sanskritdocuments.org

March 16, 2019

# Suratakathamritam Athava Aryashatakam

# સુરતકથામૃતં અથવા આર્યશતકમ્

## Sanskrit Document Information

Text title : suratakathAmRRitam

File name : suratakathAmRRitam.itx

Category : vishhnu, krishna, vishvanAthachakravartin, stavAmRRitalaharI, shataka

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# સુરતકથામૃતં અથવા આર્યશતકમ્

મૂલગ્રન્થસ્ય કેન્દ્રીયશ્લોકઃ-

કદાહં સેવિષ્યે વ્રતતિચમરીચામરમરુ-
    દ્વિનોદેન ક્રીડા કુસુમશયને ન્યસ્તવપુષૌ ।
દરોન્મીલન્નેત્રૌ શ્રમજલકણક્લિધદલકૌ
    બ્રુવાણાવન્યોન્યં વ્રજનવયુવાનાવિહ યુવામ્ ॥

ઉત્કલિકાવલ્લરી પર

શ્રીકૃષ્ણ ઉવાચ-

ચિત્રમિદં નહિ યદહો વિતરસ્યધરસુધાં નિકામં મે ।
અતિ કૃપણોઽપિ કદાચિદ્વદાન્યતમતાં જનઃ પ્રિયે ધત્તે ॥ ૧॥

લયમપિ ન યાતિ દાને પ્રત્યુત ઋદ્ધિં રસાધિકાં લભતે ।
અધરસુધોત્તમવિદ્યાં વિબુધવરાયાદ્ય મે દેહિ ॥ ૨॥

સ્વાન્તે બિભ્રતિ ભવતીં સ્વાન્તે વાસિન્યતિસ્નિગ્ધે ।
મયિ કિમપૂર્વાં નાદાસ્ત્વમિમાં ચ યસ્માદ્વિદુષ્યહો તત્ર ॥ ૩॥

શ્રીરાધાહ-

કુલરમણીતતિલજ્જાનિર્મૂલનતન્ત્રકૌશલોદ્ગારૈઃ ।
પ્રથયસિ કિમુ નિજગર્વં જ્ઞાતં પાણ્ડિત્યમસ્તિ તે તત્ર ॥ ૪॥

દૈવાદ્વિપક્ષતામપિ મયિ યાન્ત્યા બત મમૈવ સહચર્યા ।
ન્યસ્તાહં તવ હસ્તે કથમત્ર ગર્વો ભવેન્ ન તે ॥ ૫॥

અયમપિ પરમો ધર્મઃ શ્લાઘા મહતી તવેયમેવેષ્ટા ।
યૌવનફલમપિ ચેદં કુલાબલાપીડનં યદહો ॥ ૬॥

શ્રીકૃષ્ણ આહ-

સ્મરનરપતિવરરાજ્યે ધર્મઃ શર્મપ્રદોઽયમાદિષ્ટઃ ।
વત્સ્યાયનમુનિનિર્મિતપદ્ધત્યુક્તાનુસારેણ હિ ॥ ૭॥

અપિ ચ-

અત્ર પ્રમાણમિષ્ટં ચેન્મદુક્તેઽપિ ન મન્યતે કિઞ્ચિત્ ।
ભરતમુનેઃ કિલ શાસ્ત્રં શાસ્ત્રાન્તરમત્ર કો ગણયેત્ ॥ ૮॥

વિદ્યુતિ વિદ્યુતિદાયી શ્લાઘાં મનુતે પયોધરઃ સ્વીયામ્ ।
વિદ્યુદપિ સ્વાં સુષમાં પયોધરે શ્લાઘયત્યધિકામ્ ॥ ૯॥

શ્રીરાધાહ-

ગોવર્ધનગિરિકન્દરવાસી હરિરસીતિ શ્રુતં કતિધા ।
કુલબાલાહરિણીતતિરથાપિ ગચ્છત્યતો ન તે દોષઃ ॥ ૧૦॥

કિં કુર્મઃ સ્વાચરિતો ધર્મસ્ત્યક્તું કથં પુનઃ શક્યઃ ।
દિનકરપૂજનવિધિરિહ કુસુમાવચયે પ્રવર્ત્યતે ॥ ૧૧॥

શ્રીકૃષ્ણ આહ-

વૃન્દારણ્યપુરન્દરમપિ માં ન ગિરાપિ કર્હિચિન્મનુષે ।
સૂર્યારાધનગર્વસ્તદયં રાધે ન તે ભવેત્ખર્વઃ ॥ ૧૨॥

ગોવર્ધનગિરિધારણકારણમોજો ન તેઽધિકં મનુતે ।
તવ સવયસ્તતિરપિ સ તવૈકકુચશૈલગર્વેણ ॥ ૧૩॥

શ્રીરાધાહ-

ન કિલ કુચૌ મમ શૈલૌ પશ્યામ્બુજકોરકૌ નવોત્પન્નૌ ।
ન તયોર્દલનં મરકતશિલાનિભેનોરસાઽદ્ય તે યોગ્યમ્ ॥ ૧૪॥

કૌસ્તુભમણિરતિતરલઃ સરલમતિઃ પુનરહં કુલ પ્રમદા ।
તદલમનેન ધિનોતુ ત્વાં નિજસદૃશં ભૃશં હૃદિસ્થસ્તે ॥ ૧૫॥

શ્રીકૃષ્ણ આહ-

સત્યમયં ભયતરલઃ કણ્ઠતટાન્તં મમ પ્રિયે શ્રયતે ।
દયતે તવ કુચદ્વયમધિકં સમ્મર્દયત્યહો સદ્યઃ ॥ ૧૬॥

શ્રીરાધાહ-

તવ ખરનખરવિદારણસહનં કુચયોરિયં વરા શક્તિઃ ।
કિમત્ર સમ્ભવતિ સ્ફુટમનયોઃ સ્વબલપ્રકાશનાટોપઃ ॥ ૧૭॥

શ્રીકૃષ્ણ આહ-

મમ ખરનખરમહાઙ્કુશઘાતાદપિ શતગુણં બલં લબ્ધ્વા ।
કોલાદિવ કુચ કુમ્ભૌ મમાર્દયતો ભૃશં પ્રિયે પશ્ય ॥ ૧૮॥

શ્રીરાધાહ-

કુચપદ્મકુટ્મલયુગં મર્દયતિ ત્વાં નિજાતિદૌરાત્મ્યાત્ ।
વૃન્દાવનવરસિન્ધુર નનુ દયસે ત્વં નિસર્ગકારુણ્યાત્ ॥ ૧૯॥

શ્રીકૃષ્ણ આહ-

તન્વાતે મુદમુચ્ચૈસ્તાવકકુચકોરકૌ યદિમૌ ।
નખચન્દ્રોદયમધિ કિં સ્વયોગ્યમતુલં ન શોભતે પ્રિયે ॥ ૨૦॥

શ્રીરાધાહ-

નખરાનામતિખરતારતાય તે તાવકેન કિલ વિધિના ।
વ્રજવનિતાનામરુચ્ય રુષેવ નિરમાયિ કિં નૂનમ્ ॥ ૨૧॥

શ્રીકૃષ્ણ આહ-

કુસુમાદપિ મૃદુલાઙ્ગ્યાઃ કુચયોરેવાસ્તિ હન્ત કાઠિન્યમ્ ।
ઇતિ તન્ નિષ્કાશયિતું ક્ષુણત્તિ નખરાવલી ચતુરા ॥ ૨૨॥

શ્રીરાધાહ-

હન્ત કૃતં બત કિમિદં સુરતરસોન્મદકુલસ્ત્રિયાઃ કદનમ્ ।
હારાસ્ત્રુટિતાઃ કાઞ્ચી ગલિતા સ્ખલિતા તથૈવ મે વેણી ॥ ૨૩॥

શ્રીકૃષ્ણ આહ-

હારા બલાદુરુભારાઃ કૃશમપિ મધ્યં ચ નહ્યતે કાઞ્ચી ।
ચિકુરકદર્થનભૂતા વેણી તદિમા રક્ષિતું ન યોગ્યાઃ ॥ ૨૪॥

શ્રીરાધાહ-

ઊધો યેન ગિરીન્દ્રસ્તમપિ ન વહતો મમોરસો ભારઃ ।
હારૈર્ભૂષણભૂતૈરભૂદિયં સ્નેહમુદ્રા કિમ્ ॥ ૨૫॥

કુચગિરિવહનપટુત્વં કૃશમપિ મધ્યં યતો બલાદ્ધત્તે ।
મણિમયકાઞ્ચીબન્ધાદેવ તમૃતે દૃઢતાઽસ્ય કેન સ્યાત્ ॥ ૨૬॥

ઉત્કર્ષણાવાકર્ષણપર્યાયોદિતપરસ્પરાસક્ત્યા ।
પ્રીતિરિયં કિલ વેણીચિકુરાણાં ન ચ કદર્થનં વાચ્યમ્ ॥ ૨૭॥

શ્રીકૃષ્ણ આહ-

સત્યમહં ગિરિધારી કરનલિનાભ્યાં ગિરિદ્વયં ધાસ્યે ।
મધ્યસ્યાત્ર પટુત્વૈરલં બલં કિલ મમૈવાસ્તામ્ ॥ ૨૮॥

ચિકુરાણામપિ વેણ્યાઃ પરસ્પરાસક્તિઃ સૂચિતા ।
પ્રીત્યા કિં ફલમિહ યદિ પરિચરણં તે ન કુર્વન્તિ ॥ ૨૯॥

વેણીબન્ધવિમુક્તશ્ચિકુર કલાપોઽત્ર વેલ્લિતો મરુતા ।
ચામરતામુપયાતઃ સ્વિન્નાઙ્ગીં વીજયત્યહો ભવતીમ્ ॥ ૩૦॥

શ્રીરાધાહ-
આવિસ્કૃત પુરુ શિલ્પં સખ્યા મે બહુ વિલમ્બતો રચિતમ્ ।
ચિત્રકમલિકતટે તત્ક્ષણેન વિધ્વંસિતં ભવતા ॥ ૩૧॥

શ્રીકૃષ્ણ આહ-
સ્મિતમુખિ રુચાર્ધવિધુના સુચારુભાલેન મે મિલન્ત્યેષા ।
ત્વદલિકવિધુરેખાઽસ્મૈ પ્રેમ્ણાઽર્પયતિ સ્મ સર્વસ્વમ્ ॥ ૩૨॥

શ્રીરાધાહ-
ગણ્ડતટે મમ મકરી શ્યામા સરલાતિચિત્રિતાપ્યબલામ્ ।
મકરદ્વયતાટઙ્કશ્ચપલો ધૃષ્ટઃ કદર્થયત્યેનામ્ ॥ ૩૩॥

શ્રીકૃષ્ણ આહ-
રમણિ મમ શ્રુતિયુગલં ત્વદુદિતસૌધદ્રવૈઃ પ્લુતં તદપિ ।
દ્વિગુણિતતૃષ્ણં જાતં લોલુપતાયાઃ સ્વરૂપમેવૈતત્ ॥ ૩૪॥

શ્રીરાધાહ-
લોલુપચૂડામણિરસિ તવાઙ્ગવૃન્દં ચ લોલુપં યદયમ્ ।
મન્નયનાક્તમસીમપ્યધરો રાગી સ્વ મણ્ડનં કુરુતે ॥ ૩૫॥

શ્રીકૃષ્ણ આહ-
બન્ધૂકાન્તરવર્તિનમલિનમિવાયં મસીદ્રવં ધૃત્વા ।
અક્ષ્ણોરેવ મુદં તે તનુતે તદિમં કિમાક્ષિપસિ ॥ ૩૬॥

શ્રીરાધાહ-
વન્દે તવ પરિહસિતં કં દેવં પરિચરસ્યહો નિભિન્નૃતમ્ ।
યત્પ્રસાદાદધીતા સૌરતવિદ્યાતિચાતુરીધારા ॥ ૩૭॥

શ્રીકૃષ્ણ આહ-
તવ જઘનોત્તમસદનં સરસં દેવં સમુપચરામ્યતુલમ્ ।
નિભૃતનિકુઞ્જગૃહસ્થઃ પ્રતિ દિનમુચિતાધિકાર એવાહમ્ ॥ ૩૮॥

શ્રીરાધાહ-

સત્યમતઃ સ્વારૂપ્યં લબ્ધ્વા દૃપ્તઃ કુલાબલાનલિનીઃ ।
મલિનીઃ કુરુષે કા તવ નયને પતિતા સ્વકં પતિં ભજતામ્ ॥ ૩૯॥

શ્રીકૃષ્ણ આહ-
સખિ તવ નિરાવૃતાન્યતિરુચિરાન્યઙ્ગાન્યતીવ સઙ્કુચન્તિ ।
સમ્પ્રતિ મન્નયનાન્તર્વિશન્તિ મન્દાક્ષમગ્નાનિ ॥ ૪૦॥

શ્રીરાધાહ-
ધૃષ્ટતમે તવ નયને યન્મિત્રં કૌસ્તુભો દ્યુતિં તનુતે ।
તદિહ મદઙ્ગાન્યધુના શરણં યાન્તુ ત્વદઙ્ગાનામ્ ॥ ૪૧॥

શ્રીકૃષ્ણ આહ-
હિત્વા સતૃષદૃશૌ મમ વૈરાદિવ કૌસ્તુભં પરાભૂય ।
વિશતિ તવ સ્તનયુગલં મદ્ધૃદયાન્તઃ સ્વવિક્રમં બિભ્રત્ ॥ ૪૨॥

શ્રીરાધાહ-
કઠિનતમં તવ હૃદયં કુચયુગમપિ મે પ્રતીયતે કઠિનમ્ ।
તદુચિતમનયોર્મિલનં યોગ્યં યોગ્યેન યુજ્યતે યસ્માત્ ॥ ૪૩॥

શ્રીકૃષ્ણ આહ-
મદુરઃ પક્ષગતા ત્વં મમ યદ્યક્ષ્ણોર્વિપક્ષતાં કુરુષે ।
તદપિ તયોસ્ત્વદ્વદનં પ્રકામસુભગં મુદં તનુતે ॥ ૪૪॥

શ્રીરાધાહ-
સ્વચ્છન્દં યદિ રમસે રમસ્વ તત્રાબલાસ્મિ કિં કુર્યામ્ ।
ક્ષિપસિ દૃશં યદલજ્જં મદપઘને તત્કથં સહે કુલજા ॥ ૪૫॥

શ્રીકૃષ્ણ આહ-
યદિ મમ દૃષ્ટિચકોર્યા વિધુમુખિ નૈવોપલભ્યસે દૈવાત્ ।
હૃદયગૃહે ખેલસ્યપિ તથાપિ હા જ્વલયસિ પ્રસભમ્ ॥ ૪૬॥

શ્રીરાધાહ-
તવ ભુજયુગદૃઢબન્ધં વામાપીહેઽન્યથા ભવન્નયને ।
નિસ્ત્રપશિરોમણે માં ત્રપામ્બુધૌ પાતયિષ્યતઃ પ્રકટમ્ ॥ ૪૭॥

શ્રીકૃષ્ણ આહ-
ત્વન્નયને ચ મદક્ષ્ણોરન્તેવાસિત્વમિચ્છતઃ કિન્તુ ।
ગર્વાદિવ ન ચ પઠતઃ પ્રકટં પ્રૌઢિઃ કિયતો અહો યદિયમ્ ॥ ૪૮॥

શ્રીરાધાહ-
ચેતઃ સ્ફુટતિ સ્વયં ચ તથાપિ નયને ન તાદૃશે ભવતઃ ।
સાધ્વીનામિયમુચિતા એવ નિસર્ગત્રપાકુલતા ॥ ૪૯॥

શ્રીકૃષ્ણ આહ-
સમ્પ્રતિ સત્યં બ્રૂષે ત્રપાવતીનાં શિરોમણિસ્ત્વમસિ ।
વત્સ્યાયનતન્ત્રોક્તઃ સાધ્વીનામયમેવ ધર્મઃ ॥ ૫૦॥

શ્રીરાધાહ-
યદ્યપ્યરુન્ધતી સા સાધ્વીગણગણ્યગૌરવા જગતિ ।
ધર્મમિમં પાઠયિતું તામપિ શક્નોતિ તે નયનમ્ ॥ ૫૧॥

શ્રીકૃષ્ણ આહ-
રાઢે દ્વિગુણિતશોભં મદાસ્યપઙ્કેરુહં ધ્રુવં પિબતુ ।
સમ્પ્રત્યપિ નિજલોચનમધુકરયુગં કિં ન સર્વથા દિશસિ ॥ ૫૨॥

શ્રીરાધાહ-
લાવણ્યાદ્ભુતવન્યામયં ત્વદઙ્ગં ન શીલયત્યધિકમ્ ।
લોચનશફરયુગં મમ દૃગન્તજાલં યદા નુ તત્ક્ષિપસિ ॥ ૫૩॥

શ્રીકૃષ્ણ આહ-
નૂપુરમઙ્ગલવાદ્યજ્ઞાપિતમનસિજનૃપોત્સવામોદઃ ।
ત્વરિતમુપયાતિ અલિવન્દી કીર્તિં ચ તવ પ્રથયન્વિરાજતે ॥ ૫૪॥

શ્રીરાધાહ-
દયિત નૃપોઽસ્યનુભૂતઃ સત્યં મનસિજપરઃશતાનાં ત્વમ્ ।
દિશિ દિશિ સતીષુ વિક્રમવિજયં શંસતિ તવૈવાયમ્ ॥ ૫૫॥

શ્રીકૃષ્ણ આહ-
સુરતમહામખભેરી ત્રિજગતિ ગર્જંસ્તવૈષ નૂપુરઃ ।
તર્જતિ ગર્વવતીસ્તાઃ પ્રકામમમરાઙ્ગના અપિ પ્રસભમ્ ॥ ૫૬॥

શ્રીરાધાહ-
રમણમહોદિતમદભરમત્તાહં કિં બ્રવીમિ તે ચરિતમ્ ।
સ્તૌષિ મુહુર્નૂપુરમપિ નૂપુરમાત્રાવશિષ્ટભૂષાયાઃ ॥ ૫૭॥

શ્રીકૃષ્ણ આહ-
કિં કથ્યસે સ્વયં બત રમણમહે ત્વં સમુદ્ધતા સત્યમ્ ।

મદભરમત્ત યન્ નિજપરિહિતવાસોઽપિ કુરુષે સ્મરસાત્ ॥ ૫૮॥

શ્રીરાધાહ-

સ કિલ તવેષ્ટા દેવતા મદનઃ શ્રદ્ધાવતીરતો યુવતીઃ ।
ઉપદિષ્યૈતન્મન્ત્રં શિષ્યાઃ કુરુષે વિતીર્ણસર્વસ્વાઃ ॥ ૫૯॥

શ્રીકૃષ્ણ આહ-

ત્વયિ પુનરસૌ રસજ્ઞઃ સ્મરોઽપિ રોપિતમુદા વસતિ ।
યદિદં કુચહાટક સમ્પુટયુગમસ્ય સર્વસ્વમ્ ॥ ૬૦॥

શ્રીરાધાહ-

એવં ચેત્કથમનયોઃ કઞ્ચુકમથ મૌક્તિકં લસદ્ધારમ્ ।
મૃગમદચર્ચાં દલયસિ કલયસિ ચ કઠિનકરાઘાતમ્ ॥ ૬૧॥

શ્રીકૃષ્ણ આહ-

સ્વધનવ્યવહૃતિસમયે હાટકમયસમ્પુતસ્ય યદ્દૃષ્ટઃ ।
મઙ્ગલભૂષણવસનોદ્ઘાટો મુખદાર્ઢ્યતઃ નખાઘાતઃ ॥ ૬૨॥

શ્રીરાધાહ-

તદ્વ્યવહર્તા પુનરથ કૃત્વા દ્વિગુણિતસુસમ્ભારમ્ ।
આવૃત્યાતિરહઃસ્થં કુરુતે સમ્પુટમિદં ચ ભો દૃષ્ટમ્ ॥ ૬૩॥

શ્રીકૃષ્ણ આહ-

સ્મરમણિસમ્પુટકુચયુગમધુનાપ્યુત્તાનમસ્તિ તત્કાન્તે ।
હૃદયગૃહં મમ પૂરય કૃત્વાઽધો મુખમિદં મહારત્નૈઃ ॥ ૬૪॥

શ્રીરાધાહ-

વિધિના વિમૃશ્ય નિહિતં યાસામબલેતિ નામ યુક્તાર્થમ્ ।
તાસાં કુચસમ્પુટયોરધો મુખી કૃતિવિધૌ ક્વ વા શક્તિઃ ॥ ૬૫॥

શ્રીકૃષ્ણ આહ-

કતિ ન કરગ્રહવિધિના કુચસમ્પુટકાન્તરાહૃત રાધે ।
મોદમણીનાં તતયસ્તદપિ ન મે પૂર્યતે હૃદયમ્ ॥ ૬૬॥

શ્રીરાધાહ-

વ્રજવનિતાઃ શતકોટ્યસ્તવૈવ તાઃ પણ્ડિતાશ્ચ રતિતન્ત્રે ।
હૃદયં તદપિ રતૌ બત રઙ્કુતમત્વં ન તે ત્યજતિ ॥ ૬૭॥

શ્રીકૃષ્ણ આહ-

સ્મરશિખિતમે મમ હૃદિ સુકુમાર્યસ્તાઃ વિશન્તુ કિં મુગ્ધાઃ ।
ત્વમતિસમર્થા પ્રસભં પ્રવિશ્ય રાજસિ સદૈવૈકા ॥ ૬૮॥

શ્રીરાધાહ-
તદયે સ્વરઙ્ગદાને સ્વરઙ્ગનાસ્તાઃ સમાનય ક્ષિપ્રમ્ ।
તત્તન્નામ ગૃહીત્વા મુરલીગાને તવાત્ર કો યત્નઃ ॥ ૬૯॥

શ્રીકૃષ્ણ આહ-
નન્દનવનકુસુમાઞ્ચિતશિરોઽપિ ધર્તું નિજાત્યયોગ્યતયા ।
તવ પદનખતલસવિધે લજ્જં તે સુરવરાઙ્ગના અપિ તાઃ ॥ ૭૦॥

શ્રીરાધાહ-
નાભીવિવરવરાન્મે સમુદ્ગતેયં ન કાન્તરોમાલી ।
કિન્તુ પ્રકુપિતભુજગી તદુન્મુખં કિમુ ચિકીર્ષસિ સ્વકરમ્ ॥ ૭૧॥

શ્રીકૃષ્ણ આહ-
તવ રોમાલીભુજગીં ખેલયિતું મત્કરશ્ચલત્યભિતઃ ।
ભવદખિલાઙ્ગગતાન્યપિ રોમાન્યુદ્યાન્તિ કિં રોદ્ધુમ્ ॥ ૭૨॥

શ્રીરાધાહ-
મદખિલગાત્રભટા અપિ યતઃ પરાભવમવાપ્ય મુહ્યન્તિ ।
સ્મરરણમત્તે ત્વયિ કિં બત રોમ્ણાં યુજ્યતે યુદ્ધમ્ ॥ ૭૩॥

શ્રીકૃષ્ણ આહ-
વયમતિકૃશાશ્ચ તદપિ પ્રભવામોદ્ગમવિધાવિતિ પ્રકટમ્ ।
ભવતીમુદ્ગમચર્યાં રોમભટાઃ સ્મરયન્ત્યહો ચતુરાઃ ॥ ૭૪॥

શ્રીરાધાહ-
રતિરસપરવશ ! સહતે તેઽતથ્યં કિં મે તનોરન્વયઃ ।
રમયસ્વ અતિવામામપિ તાં ન ચ દયસે કાન્ત્યા વેદયસે ॥ ૭૫॥

શ્રીકૃષ્ણ આહ-
સ્મરશરરાધે રાધે સમરે સમરેખયાઞ્ચિતે દ્વિતયે ।
ઇહ ભવદઙ્ગમદઙ્ગે પ્રતિભટમધુના ધુનાનેસ્તામ્ ॥ ૭૬॥

શ્રીરાધાહ-
પ્રસ્વેદામ્બુ વમન્તી ઘનરસસિક્તેવ ગાત્રવલ્લી મે ।
દલિતો લલિતાકલ્પસ્તલ્પશ્ચ ખણ્ડિતો નો વા કતિધા ॥ ૭૭॥

શ્રીકૃષ્ણ આહ-

મદનઘનાઘન એષ સ્વેદમિષાદ્વર્ષતીહ તનુવલ્લીમ્ ।
ઘનરસભરૈઃ પ્રતિપદમુદિતલસત્કોરકાં કાન્તે ॥ ૭૮॥

શ્રીરાધાહ-

પ્રિય તવ તરુણિમજલધેરવધેરન્વેષણં કથં કુરુતામ્ ।
મહિલામતિમકરી તદ્વિરમ્યતાં રમ્યતાં રતં યાતુ ॥ ૭૯॥

શ્રીકૃષ્ણ આહ-

અતિનિઃશ્વસિતસમીરણવેગાદ્દ્વિગુણીભવન્મહાવીચિમ્ ।
કેલિસુધાસરિતં નૌ માનસકરિણૌ મુહુર્મુહુર્ભજતામ્ ॥ ૮૦॥

શ્રીરાધાહ-

ખેલતિ મનઃકરી તે સત્યં પ્રકટં સ લક્ષ્યતે કિન્તુ ।
તત્રૈક્યં મમ મનસો બ્રૂષે કોઽત્રાભિપ્રાયસ્તે ॥ ૮૧॥

શ્રીકૃષ્ણ આહ-

શ્રીમન્મદનસુરોત્તમસેવા સમ્સિદ્ધયે તુ નૌ મનસી ।
ઐક્યમવાપ્ય ત્વરયા તત્ર ચ સાયુજ્યમીહેતે ॥ ૮૨॥

શ્રીરાધાહ-

સ્વસ્મિન્નેવ તનોર્મમ મનસશ્ચાપ્યેકદૈવ સાયુજ્યમ્ ।
પ્રસભં કુરુષે દેવ ત્વમેવ સાક્ષાન્મહામદનઃ ॥ ૮૩॥

શ્રીકૃષ્ણ આહ-

સર્વસ્વાત્મસમર્પણકારિણ્યૈ તે મુદા મારઃ ।
સ્વીયાં મૌક્તિકમાલામલિકે સ્વેદકણવ્યાજાદ્દત્તે ॥ ૮૪॥

શ્રીરાધાહ-

ત્વદલકનિકરસ્તામપિ નીત્વા સ્તિમ્યતિ હઠાદયં ચપલઃ ।
મદનપ્રસાદ ઇત્યતિભાગ્યં સંશ્લાઘતે સ્વીયમ્ ॥ ૮૫॥

શ્રીકૃષ્ણ આહ-

તામ્બૂલામૃતરસલવલાભેનૈવાત્ર ગર્વિતે ભવન્નયને ।
અન્તર્બહિરપિ તદ્રસમુદિતે ગણ્ડે કથં નુ મે હસતઃ ॥ ૮૬॥

શ્રીરાધાહ-

યત્સૂચયસિ રસપ્રિય તદિદં સ્વેનૈવ પાઠિતં તન્ત્રમ્ ।

સ્વયમેવ વ્યાચષ્ટે સ ભવાનિતિ કિલ નમસ્તુભ્યમ્ ॥ ૮૭॥

શ્રીકૃષ્ણ આહ-
મન્મુખપઙ્કેરુહમપિ ચિત્રમિદં યદ્ધિકાશયસ્યધિકમ્ ।
ગુણવત્યતિસુરભિતેન સ્વવદનસુધાકરસુધાદ્રવેણ હિ ॥ ૮૮॥

શ્રીરાધાહ-
નીલનિધેર્બત પોતો બિન્દુવ્યાજેન રક્ષિતશ્ચિબુકે ।
તમપિ ચ ભવદધરોઽયં હૃતવાનિતિ કતિ મૃષામ્યનયમ્ ॥ ૮૯॥

શ્રીકૃષ્ણ આહ-
અનુરાગિણમપિ સાગસમધરં મે દણ્ડયસ્યતઃ કોપાત્ ।
રદનાસ્ત્રેણ તદપ્યભિમનુતે લબ્ધપ્રસાદમેવાયમ્ ॥ ૯૦॥

શ્રીરાધાહ-
અધિ રદનચ્છન્દનં મે સ્વરદનકીર્તિં ન કિં વિચારયસિ ।
યુવતીસભાસુ ચિત્રં ત્રપાકુલતમતેયં નુ મયિ સૃષ્ટા ॥ ૯૧॥

શ્રીકૃષ્ણ આહ-
વિષમાશુગરણરઙ્ગે સ્વાઙ્ગેનાતુલ પરાક્રમા ક્રમસે ।
દર્શય ભુજબલમયિ ભો મયિ તે દયિતે ગુણાવલી ફલતુ ॥ ૯૨॥

શ્રીરાધાહ-
તન્વીમપિ તનુમેતાં મુહુરતિદાર્ઢ્યેન વેષ્ટયતે ।
ત્વદ્ભુજભુજાઙ્ગપાશઃ શ્વાસો મે કેવલં વલતે ॥ ૯૩॥

શ્રીકૃષ્ણ આહ-
સમ્પ્રતિ સાક્ષાત્કારો મદનસ્ય સ્યાદિતીવ જાનીમઃ ।
યન્ નશ્ચેતસ્ત્વરતે નિરુપમમત્રૈકભાવાય ॥ ૯૪॥

શ્રીરાધાહ-
તાણ્ડવપણ્ડિત નિતરામલમધ્યાપનશ્રમેણ તે ।
મદપઘનાઃ સ્વયમેતે ચારણચર્યાસુ યાન્તિ નૈપુણ્યમ્ ॥ ૯૫॥

શ્રીકૃષ્ણ આહ-
મદનમહાઘનઘૂર્ણાઘ્રાતાન્યઙ્ગાનિ નૌ પ્રિયે યુગપત્ ।
શ્વાસોદિતજયચતુરિમભરમન્યોન્યં દિશન્તિ સોન્માદમ્ ॥ ૯૬॥

(શ્રી ગ્રન્થકર્તાહ- )

લોચનમીનચતુષ્ટયમધુના નિષ્પન્દતામુરીકુરુતે ।
રસભરવિસ્મયમત્તે નૈસર્ગિકચેષ્ટિતસ્મૃતિઃ કિં સ્યાત્ ॥ ૯૭॥

ચન્દનનલદસુધાંશુદ્રવમયજલયન્ત્રવેશ્મમધ્યસ્થે ।
સ્થલજલરુહદલકલ્પિતતલ્પેઽસુપ્તાં રતશ્રાન્તૌ ॥ ૯૮॥

ક્રમવલિતૈર્નિઃશ્વસિતૈઃ સુરભયતોઃ સ્વામિનોરથાન્યોન્યમ્ ।
નિદ્રાવૃદ્ધિમવેત્ય પ્રમોદસિન્ધાવયં જનઃ પ્લવતામ્ ॥ ૯૯॥

સુરતકથામૃતમાર્યશતકં નતકન્ધરો જનો જુષતામ્ ।
રતસુખધામગવાક્ષશ્રિતનયનઃ સ્વામિનોરહો કૃપયા ॥ ૧૦૦॥

પ્રવિશતુ શનૈઃ શનૈરથ મૂકિતનૂપુરં જનસ્તત્ર ।
ગાત્રે નિભાલ્ય યૂનોઃ સ્વવલયરાજી પિધાય બધ્નાતુ ॥ ૧૦૧॥

કમ્પનચકિતૈરલિભિસ્ત્યક્તુમશક્યેન તાલવૃન્તેન ।
વીજયતુ શ્રમસલિલં પ્રત્યઙ્ગં શોષિતં નિરૂપયતુ ॥ ૧૦૨॥

રાધાકુણ્ડતટવાસમહાસમ્પદં મદઃ સોઽયમ્ ।
કિમુ વાઞ્છિતમતિદુર્લભવસ્તુનિ તમૃતે મમાસ્તુ સમ્ભાવ્યમ્ ॥ ૧૦૩॥

અષ્ટમક્ અધિકરહસ્યવ્યઞ્જકં મથ્નન્ નિબધ્યતેઽત્ર શતકે ।
તાદૃશભાવવિભાવિતહૃદયેનૈવાસ્તુ તત્સેવ્યમ્ ॥ ૧૦૪॥

ખવિયદૃતુક્ષમાગણિતે શાકે વૃષસંસ્થિતે દિવાધીશે ।
સુરતકથામૃતમુદગદુદયતાં ચ ભક્તહૃન્નભસિ ॥ ૧૦૫॥

ઇતિ મહામહોપાધ્યાયશ્રીવિશ્વનાથચક્રવર્તિવિરચિતં
સુરતકથામૃતં સમાપ્તમ્ ॥

*Suratakathamritam Athava Aryashatakam*

pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*